# पञ्चदशोऽध्यायः

श्रीभगवानुवाच—

ऊर्द्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१॥

सारा०ब०—संसारच्छेदकोऽसङ्ग आत्मेशांशः क्षराक्षरात् ।
उत्तमः पुरुषः कृष्ण इति पञ्चदशे कथा ॥ (१)

पूर्व्वाध्याये "माञ्च योऽव्यभिचारेण भक्तियोगेन सेबते । स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥" इत्युक्तम् । तत्र तब मनुष्यस्य भक्तियोगेन कथं ब्रह्मभाव इति चेत् सत्यमहं गनुष्य एब किन्तु ब्रह्मणोऽपि तस्य प्रतिष्ठा परमाश्रय इत्यस्य सूत्ररूपस्य वृत्तिस्थानीयोऽयं पञ्चदशाध्याय आरभ्यते, तत्र स गुणान् समतीत्य इत्युक्तमिति गुणमयोऽयं संसारः कः कुतो बायं प्रवृत्तास्तद्भक्त्या संसारमतिक्राम्यन् जीबो बा कः ब्रह्म-भूयाय कल्पत इत्युक्तं ब्रह्म बा किं ब्रह्मणः प्रतिष्ठा त्वं बा क इत्याद्यपेक्षायां प्रथममतिशयोक्त्यलङ्कारेण संसारोऽयमद्भुतो-ऽश्वत्थवृक्ष इति बर्णयति—उद्र्ध्वे सर्व्वलोकोपरितले सत्यलोके प्रकृतिबीजोत्थ--प्रथम--प्ररोहरूप-महत्--तत्त्वात्मकश्चतुर्म्मुख एब मूलं यस्य तम्, अधः-स्वर्भुवोभूर्लोकेष्वनन्ता देबगन्धर्व्व-किन्नरासुरराक्षसप्रेतभूतमनुष्यगवाश्वादिपशुपक्षि-कृमिकीट-पतङ्ग-स्थावरान्ताः शाखा यस्य तमश्वत्थं धर्म्मादिचतुर्व्वर्गसाधक-त्वादश्वत्थमुत्तमं वृक्षम्, श्लेषेण-भक्तिमतां न श्वः स्थास्य-तीत्यश्वत्थं नष्टप्रायमित्यर्थोऽभक्तानां त्वव्ययमनश्वरम् । छन्दांसि "बायव्यं श्वेतमालभेत, भूमिकाम ऐन्द्रमेकादशकपालं निर्व्वपेत्

चाशुभवासना आसुरी राक्षसी च प्रकृतिर्निरयनिपातोपयोगिनी
सा, सा चासुर-सम्प्रदायोर्हेयं फलमित्येतद्बोधयितुं षोडशस्या-
रम्भः। अत्र दैवीं सम्पदं भगवानुवाच-अभयमित्यादिना
त्रिकेण। चतुर्णामाश्रमाणां वर्णानाञ्च धर्म्माः क्रमादिह कथ्यन्ते।
सन्न्यासिनां तावदाह-अभयं निरुद्यमः कथमेकाकी जीविष्या-
मीति भयशून्यत्वम्, सत्त्वसंशुद्धिः स्वाश्रमधर्म्मानुष्ठानेन मनो-
नैर्म्मल्यम्, ज्ञानयोगे श्रवणादौ ज्ञानोपाये, व्यवस्थितिः परि-
निष्ठेति त्रयम्, अथ गृहस्थानामाह-दानं स्वभोग्यस्य न्याया-
र्जितस्य अन्नादेः सत्पात्रे यथायोग्यं समर्पणम्, दमो बाह्ये-
न्द्रियवर्गस्य यथायोग्यं संयमः, यज्ञोऽग्निहोत्रादेर्विहितस्यानुष्ठान-
मिति त्रयम्, अथ ब्रह्मचारिणामाह-स्वाध्यायो ब्रह्मयज्ञः शक्ति-
मतो भगवतः प्रतिपादकोऽयमपौरुषेयोऽक्षरराशिरित्यनुस-
न्धाय वेदभ्यासनिष्ठतेत्येकम्, अथ वानप्रस्थानामाहतप
इति, तच्च शरीरादित्रिभेदमित्यष्टादशे वक्ष्यमाणं बोध्य-
मित्येकम् अथ वर्णेषु विप्राणामाह-आर्ज्जवं सारल्यम्, तच्च
श्रद्धालुश्रोतृषु स्वज्ञातार्थागोपनं ज्ञेयम्, अहिंसा प्राणिजीविका-
नुच्छेदकता, सत्यमनर्थाननुबन्धियथादृष्टार्थविषयं वाक्यम्,
अक्रोधो दुर्ज्जनकृते स्व-तिरस्कारेऽभ्युदितस्य कोपस्य निरोधः,
त्यागो दुरुक्तेरपि तत्राप्रकाशः, शान्तिर्मनसः संयमः, अपैशुनं
परोक्षे परानर्थकारि-वाक्याप्रकाशनम्, भूतेषु दया तद्दुःखा-
सहिष्णुता, अलोलुत्वं निर्लोभता-पलोपश्छान्दसः, मार्द्दवं कोम-
लत्वं सत्पात्रसङ्गविच्छेदासहनम्, ह्रीर्विकर्म्मणि लज्जा, अचा-
पलं व्यर्थक्रियाविरह इति द्वादश। अथ क्षत्रियाणामाह-तेज-
स्तुच्छजनानभिभाव्यत्वम्, क्षमा सत्यपि सामर्थ्ये स्वासमानं
परिभावकं प्रति कोपानुदयः, धृतिः शरीरेन्द्रियेष्ववसन्नेष्वपि
तदुत्तम्भकः प्रयत्नो येन तेषां नावसादः स्यादिति त्रयम्। अथ



वैश्यानामाह-शौचं व्यापारे वाणिज्ये मायानृतादि-राहित्यम्,
अद्रोहः परजिघांसया खड्गाद्यग्रहणमिति द्वयम्। अथ शूद्राणा-
माह-नातिमानिता आत्मनि पूज्यत्वभावना-शून्यता विप्रादिषु
त्रिषु नम्रतेत्येकमिति षड्विंशतिः। एते तत्र तत्र प्रधानभूता
बोध्या अनुक्तानामप्युपलक्षणार्थाः। देहारम्भकालोन्मुखैः सुकृ-
तैर्व्यक्तां दैवीं शुभवासनामभिलक्षीकृत्य जातस्य पुरुषस्य भवन्ति
इत्यन्ते-"पुण्यः पुण्येन कर्म्मणा भवति पापः पापेन" इति श्रुतेः।
देवाः खलु परेशानुवृत्तिशीलास्तेषामियं सम्पदनया तत्प्रापक-
ज्ञानभक्तिसम्भवात् संसारतरोरुपादेयं फलमेतत् ॥१-३॥

**दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।**
**अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥४॥**

सारा०व०—बन्धकानि फलान्याह-'दम्भः' स्वस्याधार्म्मिक-
त्वेऽपि धार्म्मिकत्वप्रख्यापनम्, 'दर्पो' धनविद्यादिहेतुको गर्व्वोऽ-
भिमानोऽन्यकृतसम्माननाकाङ्क्षित्वं कलत्रपुत्रादिष्वासक्तिर्वा,
'क्रोधः' प्रसिद्धः 'पारुष्यं' निष्ठुरता, अज्ञानमविवेकः, आसुरी-
मित्युपलक्षणं राक्षसीमपि सम्पदमभिजातस्य राजस्यास्ताम-
स्याश्च सम्पदः प्राप्तिसूचकक्षणे जन्मलब्धवतः पुंसः एतानि
दम्भादीनि भवन्तीत्यर्थः ॥ ४ ॥

गी०भू०—अथ नरकहेतुमासुरीं सम्पदमाह-दम्भ इत्येकेन।
दम्भो धार्म्मिकत्वख्यातये धर्म्मानुष्ठानम्, दर्पो विद्याभिजनजन्यो
गर्व्वः, अभिमानः स्वस्मिन्नभ्यर्च्यत्वबुद्धिः, क्रोधः प्रसिद्धः, पारुष्यं
प्रत्यक्षं रुक्षभाषितम्, चकारश्चापलादेः समुच्चायकः, अज्ञानं
कार्य्याकार्य्यविवेकधीशून्यत्वम्, चकारोऽधृत्यादेः समुच्चायकः।
एते देहारम्भकालोन्मुखैर्दुष्कृतैर्व्यक्तामासुरीमशुभवासनामभि-
लक्ष्य जातस्य पुरुषस्य भवन्ति-"पापः पापेन" इति श्रुतेः ॥४॥

चाशुभवासना आसुरी राक्षसी च प्रकृतिर्निरयनिपातोपयोगिनी सा, सा चासुर-सम्पत्तयोर्द्वयं फलमित्येतद्बोधयितुं षोड़शस्यारम्भः। अत्र दैवीं सम्पदं भगवानुवाच–अभयमित्यादिना त्रिकेण। चतुर्णामाश्रमाणां वर्णानाञ्च धर्म्माः क्रमादिह कथ्यन्ते। सन्न्यासिनां तावदाह–अभयं निरुद्यमः कथमेकाकी जीविष्यामीति भयशून्यत्वम्, सत्त्वसंशुद्धिः स्वाश्रमधर्म्मानुष्ठानेन मनोनैर्म्मल्यम्, ज्ञानयोगे श्रवणादौ ज्ञानोपाये, व्यवस्थितिः परिनिष्ठेति त्रयम्, अथ गृहस्थानामाह–दानं स्वभोग्यस्य न्यायार्ज्जितस्य अन्नादेः सत्पात्रे यथायोग्यं समर्पणम्, दमो बाह्येन्द्रियवर्गस्य यथायोग्यं संयमः, यज्ञोऽग्निहोत्रादेर्विहितस्यानुष्ठानमिति त्रयम्, अथ ब्रह्मचारिणामाह–स्वाध्यायो ब्रह्मयज्ञः शक्तिमतो भगवतः प्रतिपादकोऽयमपौरुषेयोऽक्षरराशिरित्यनुसन्धाय वेदभ्यासनिष्ठतेत्येकम्, अथ वानप्रस्थानामाहतप इति, तच्च शरीरादित्रिभेदमित्यष्टादशे वक्ष्यमाणं बोध्यमित्येकम् अथ वर्णेषु विप्राणामाह–आर्ज्जवं सारल्यम्, तच्च श्रद्धालुश्रोतृषु स्वज्ञातार्थागोपनं ज्ञेयम्, अहिंसा प्राणिजीविकानुच्छेदकता, सत्यमनर्थाननुबन्धियथादृष्टार्थविषयं वाक्यम्, अक्रोधो दुर्ज्जनकृते स्व-तिरस्कारेऽभ्युदितस्य कोपस्य निरोधः, त्यागो दुरुक्तेरपि तत्राप्रकाशः, शान्तिर्मनसः संयमः, अपैशुनं परोक्षे परानर्थकारि-वाक्याप्रकाशनम्, भूतेषु दया तद्दुःखासहिष्णुता, अलोलुत्वं निर्लोभता–फलोपरागाद्रसः, मार्द्दवं कोमलत्वं सत्पात्रसङ्गविच्छेदासहनम्, ह्रीर्विकर्म्मणि लज्जा, अचापलं व्यर्थक्रियाविरह इति द्वादश। अथ क्षत्रियाणामाह–तेजस्तुच्छजनानभिभाव्यत्वम्, क्षमा सत्यपि सामर्थ्ये स्वासमानं परिभावकं प्रति कोपानुदयः, धृतिः शरीरेन्द्रियेष्ववसन्नेष्वपि तदुत्तम्भकः प्रयत्नो येन तेषां नावसादः स्यादिति त्रयम्। अथ



वैश्यानामाह–शौचं व्यापारे वाणिज्ये मायानृतादि-राहित्यम्, अद्रोहः परजिघांसया खड्गाद्यग्रहणमिति द्वयम्। अथ शूद्राणामाह–नातिमानिता आत्मनि पूज्यत्वभावना-शून्यता विप्रादिषु त्रिषु नम्रतेत्येकमिति षड्विंशतिः। एते तत्र तत्र प्रधानभूता बोध्या अनुक्तानामप्युपलक्षणार्थाः। देहारम्भकालोन्मुखैः सुकृतैर्व्यक्तां दैवीं शुभवासनामभिलक्षीकृत्य जातस्य पुरुषस्य भवन्ति उदयन्ते–"पुण्यः पुण्येन कर्म्मणा भवति पापः पापेन" इति श्रुतेः। देवाः खलु परेशानुवृत्तिशीलास्तेषामियं सम्पदन्वया तत्प्रापकज्ञानभक्तिसम्भवात् संसारतरोरुपादेयं फलमेतत् ॥१–३॥

**दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।**
**अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥४॥**

साराऽब०—बन्धकानि फलान्याह–'दम्भः' स्वस्याधार्म्मिकत्वेऽपि धार्म्मिकत्वप्रख्यापनम्, 'दर्पो' धनविद्यादिहेतुको गर्व्वोऽभिमानोऽन्यकृतसम्मननाकाङ्क्षित्वं कलत्रपुत्रादिष्वासक्तिर्वा, 'क्रोधः' प्रसिद्धः 'पारुष्यं' निष्ठुरता, अज्ञानमविवेकः, आसुरीमित्युपलक्षणं राक्षसीमपि सम्पदमभिजातस्य राजस्यास्तामस्याश्च सम्पदः प्राप्तिसूचकक्षणे जन्मलब्धवतः पुंसः एतानि दम्भादीनि भवन्तीत्यर्थः ॥ ४ ॥

गी०भू०—अथ नरकहेतुमासुरीं सम्पदमाह–दम्भ इत्येकेन। दम्भो धार्म्मिकत्वख्यातये धर्म्मानुष्ठानम्, दर्पो विद्याभिजनजन्यो गर्व्वः, अभिमानः स्वस्मिन्नभ्यर्च्यत्वबुद्धिः, क्रोधः प्रसिद्धः, पारुष्यं प्रत्यक्षं रूक्षभाषितम्, चकारश्चापलादेः समुच्चायकः, अज्ञानं कार्य्याकार्य्यविवेकधीशून्यत्वम्, चकारोऽधृत्यादेः समुच्चायकः। एते देहारम्भकालोन्मुखैर्दुष्कृतैर्व्यक्तामासुरीमशुभवासनामभिलक्ष्य जातस्य पुरुषस्य भवन्ति–"पापः पापेन" इति श्रुतेः ॥४॥

